उद्योतो भूमावप्रतिष्ठितो गगनतलवर्त्ती स दिग्दाहः । ठाणा० ४७६ ।

**दिसिदाह–**अन्यतमदिगन्तरविभागे उपरि प्रकाशोऽधस्तादन्धकार ईदृक् छिन्नमूलो दिग्दाहः । आव० ७३५ । दिग्दाहः–अन्यतमस्यां दिशि अधोऽन्धकाराः उपरि च प्रकाशात्मका दह्यमानमहानगरप्रकाशकल्पाः । भग० १९६ । दिशि पूर्वादिकायां छिन्नमूलो दाहः प्रज्वलनदिग्दाहः । व्य० द्वि० २४१ आ ।

**दिसिपडिवज्झावणं–**दिक्प्रतिपादनं अचित्तसंयतपारिष्ठापनिकीविधि प्रतिदिक्प्रदर्शनम् । आव० ६३९ ।

**दिसिविभागो–**दिग्विभागः–अचित्तसंयतपारिष्ठापनिकीं प्रति दिक्प्रदर्शनं दिक्प्रतिपादनम् । आव० ६३९ ।

**दिसिभाए–**दिशां भागः दिग्रूपो वा भागो गगनमण्डलस्य दिग्भागः । भग० ६ ।

**दिसोदिसं–**दिसाश्च विदिसाश्च दिसोदिसं । नि० चू० प्र० २०४ आ । एकस्या दिशः सकाशादन्यां दिशं दिशोदिशम् । प्रश्न० १९ । दिशोदिशं–सर्वास्वप्येकेन्द्रियादिषु भावदिक्षु । आचा० ४३० ।

**दिसोदिसि–**दिशः सकाशादन्यस्यां दिशि अभिमतदिक्त्यागाद्दिगन्तराभिमुखेनेत्यर्थः दिशोदिशः, अथवा दिगेवोपदिग् नाशनाभिप्रायेण यत्र प्रतिषेधने तद्दिगपदिक् । भग० ३१९ ।

**दिस्स–**दृष्ट्वा–अवलोक्य । उत्त० ४६० ।

**दीई–**असूया । उप० मा० गा० २९२ ।

**दीण–**दीनः–द्रव्यदैन्यमङ्गीकृत्य म्लानवदनः । दश० १८६ । दीन–दीनः–शृगालत्वविहारी । आचा० २५३ ।

**दीणजाती–**दीनं–दैन्यवन्तं पुरुषं दैन्यवद्वा यथा भवति तथा याचन इत्येवंशीलो दीनयाची दीनं वा, यातीति दीनयायी दीना वा–हीना जातिरस्येति दीनजातिः । ठाणा० २०६ ।

**दीणपन्ने–**दीनप्रज्ञः–हीनसूक्ष्मार्थालोचनः । ठाणा० २०७ ।

**दीणमणे–**दीनमनाः–स्वभावत एवानुन्नतचेत्ताः । ठाणा० २०७ ।

**दीणरूवे–**दीनरूपः–मलीनजीर्णवस्त्रादिनेपथ्यापेक्षया । ठाणा० २०७ ।

**दीणववहारे–**दीनव्यवहारः–दीनान्योऽन्यदानप्रतिदानादिक्रियः हीनविवादो वा । ठाणा० २०७ ।

**दीणसंकप्पे–**दीनसङ्कल्पः–उन्नतचित्तस्वाभाव्येऽपि कथञ्चिद्दीनविमर्शः । ठाणा० २०७ ।

**दीणसीलाचारे–**दीनशीलसमाचारः–हीनधर्म्मानुष्ठानः । ठाणा० २०७ ।

**दीणा–**दीना–दैन्यवती । विपा० ४६ ।

**दीणार–**दीनारं–सुवर्णमुद्रा । दश० ३७ ।

**दीणारमालिया–**दीनारमालिका–भूषणविधिविशेषः । जीवा० २६९ ।

**दीणारो–**दीनारः । आव० ३४१ । नि० चू० प्र० ३३० अ ।

**दीणोभासी–**दीनवदवभासते प्रतिभाति–अवभाषते वा याचत इत्येवंशीलो दीनावभासी दीनावभाषी वा । ठाणा० २०७ ।

**दीनदिट्ठी–**दीनदृष्टिः–विच्छायचक्षुः । ठाणा० २०७ ।

**दीपका–**रथवीरपुर उद्यानम् । विशे० १०२० ।

**दीपिया–**द्वीपिकाः–चित्रकाः । ज्ञाता० ७० ।

**दीप्तजिव्हा–** । आचा० २४३ ।

**दीप्तिमान्–**पराधृष्यः । आचा० ३ ।

**दीर्घकालद्रव्यप्रसूतिप्ररूपी–**बहुरतः । आव० ३११ ।

**दीर्घकालिक–**सञ्ज्ञायास्तृतीयो भेदः । सम० १८ ।

**दीर्घपृष्ठ–** । नंदी० १६७ ।

**दीर्घबाहुः–**नामविशेषः । सम० १५६ ।

**दीर्घसेनः–**नामविशेषः । सम० १५९ ।

**दीर्घा–**स्थूला । जं० प्र० १७४ ।

**दीव–**द्वीपः । प्रज्ञा० ७१ । प्रदीपः–ज्योतिः । नि० चू० प्र० ४८ अ । द्वीपः दीपो वा । प्रश्न० १०३ । जीवा० २२१ । द्वाभ्यां मुखेन करेण च पिबतीति द्वीपः–हस्त्येव । जीवा० १२२ । द्वीपः–जलेनावृतं क्षेत्रम् । जं० प्र० २९३ । दीप्यत इति दीपः । उत्त० २१२ । द्वीपम् । जं० प्र० ५३८ । मोहनीयस्य स्थाने पञ्चमम् । आव० ६६१ । सुराष्ट्राद्दक्षिणसमुद्रे स्थलम् । बृ० द्वि० २२७ अ । दीपः–प्रकाशकं वस्तु । ठाणा० ५१७ । दीपसाखाः–प्रदीपकार्यकारिणः । सम० १८ । द्विर्गता आपोऽस्मि-



Jain Education International For Private & Personal Use Only www.jainelibrary.org